# जैमिनीयन्यायमालाविस्तरः

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

# JAIMINĪYANYĀYAMĀLĀVISTARA

By

ŚRĪ MĀDHAVĀCĀRYA

Edited by

**Jivananda Vidyasagara Bhattacharya**

Preface by

**Mimansa-Bhooshan**

**Pt. Gajanan Shastri Musalgaonkar**

**RASHTRIYA SANSKRIT SANSTHAN**

Deemed University

56-57, Institutional Area, Janakpuri

New Dehli-110058

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **जैमिनीयन्यायमालाविस्तरः** इति नामकः मीमांसा शास्त्रीयः संस्थानस्य पुनर्मुद्रण- योजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

- **राधावल्लभः त्रिपाठी**

# जैमिनीयन्यायमालाविषयसूचिका


| विषयाः | | | | पार्श्व |
|---|---|---|---|---|
| उपोद्घातः | .... | .... | .... | १ |
| ग्रन्थरचनप्रकारः | .... | .... | .... | २ |
| शास्त्रादिसंगतिः | .... | .... | .... | ५ |
| अध्यायानां पादानां च विषयाः | .... | .... | .... | ६ |
| संगतिप्रदर्शनम् | .... | ... | .... | १३ |
| प्रथमोऽध्यायः [ प्रमाणम् ] | .... | .... | .... | १५ |
| द्वितीयोऽध्यायः [ कर्मभेदः ] | .... | .... | .... | ७१ |
| तृतीयोऽध्यायः [ शेषशेषित्वविचारः ] | | .... | .... | १२८ |
| चतुर्थोऽध्यायः [ प्रयुक्तिविचारः ] | | .... | .... | २४८ |
| पञ्चमोऽध्यायः [ अनुष्ठानक्रमः ] | | .... | .... | २९७ |
| षष्ठोऽध्यायः [ अधिकारः ] | .... | .... | .... | ३३१ |
| सप्तमोऽध्यायः [ अतिदेशः ] | .... | .... | .... | ४०५ |
| अष्टमोऽध्यायः [ विशेषातिदेशः ] | | .... | .... | ४२३ |
| नवमोऽध्यायः [ ऊहः ] | .... | .... | .... | ४४४ |
| दशमोऽध्यायः [ बाधः ] | .... | .... | .... | ५११ |
| एकादशोऽध्यायः [ तन्त्रम् ] | .... | .... | .... | ६४६ |
| द्वादशोऽध्यायः [ प्रसंगः ] | .... | .... | .... | ६८५ |

इन्द्रियावी पशुमान् भवतीति। अत्राष्टत्वादिसंख्या-सामान्यात् पुरोडाशादीनां गायत्र्यादिरूपत्वकल्पना कृता। इष्टिविधायके वाक्ये येयं द्वादशसंख्या तस्यामष्टत्वादिसंख्यानामन्तर्भावात्ताः संख्यानिमित्तीकृत्याग्निहोत्रशब्द-वदष्टाकपालादिशब्दाः कर्मनामधेयानीत्येकः पक्षः। नात्र द्वादशकपालशब्दः संख्यापरः। किन्तु पुरोडाश-द्रव्यपरः। द्वादशसु कपालेषु संस्कृत इति व्युत्पत्तेः। एवमेवाष्टाकपालादिशब्दा अपि। तथा सति द्रव्यस्य द्रव्यान्तरेऽनन्तर्भावान्नामधेयस्य निमित्तं नास्तीति चेत्। एवं तर्हि पुरोडाशद्रव्यरूपो गुणो विधीयताम्। न चोत्-पत्तिशिष्टद्वादशकपालपुरोडाशावरुद्धत्वादष्टाकपालादेरनव-काश इति वाच्यम्। ब्रह्मवर्चसादिफलाय तद्विध्युप-पत्तेरित्यपरः पक्षः। अयमप्यनुपपन्नः। बहूनां गुणानां विधौ वाक्यभेदापत्तेः। न च भिन्नान्येवैतानि वाक्यानीति वाच्यम्। वैश्वानरं द्वादशकपालं निर्वपेदिति विहितस्य यस्मिञ्जात एतामित्युपसंहारेण वाक्यैकत्वावगमात्। तस्मादंशैरष्टाकपालादिभिरंशी द्वादशकपालः स्तूयते। अत्र गुरुमतमाह।

अगुणत्वादनामत्वादमन्त्रत्वादनन्वये।
अष्टत्वाद्यप्रमाणं चेन्नार्थवादतयान्वयात्॥ २७॥

उक्तरीत्या गुणत्वं नामत्वञ्च न सम्भवति। उत्तमपुरुषा-मन्त्रणाद्यभावाच्च मन्त्रत्वम्। अतोऽष्टाकपालादीनामन-न्वयादप्रामाण्यं वाक्यस्येति चेत्। नैवम्। स्तावकत्वेनान्वय-स्योक्तत्वात्।